नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 25

No. of Printed Pages — 3

# VU—87–Sahit. Shas.

## वरिष्ठ उपाध्याय परीक्षा, 2014

## साहित्य-शास्त्रम्

समय : $3\frac{1}{4}$ घंटे

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

1. सर्व: रिक्त: लघु: पूर्णता कस्मै भवति ? 1
2. वेत्रवती नदी कुत्र प्रवहति ? 1
3. मेघ: कस्य प्रकृतिपुरुष: ? 1
4. अश्लीलदोष: कतिविध: ? नामानि लेख्यानि । 2
5. कति रसा: ? तेषां नामानि गणयत । 2
6. अविवक्षितवाच्यध्वने: भेदान् विलिखत । 2
7. का विचक्षणलक्षणा ? 2
8. ''प्राप्ते मित्रे भवति विमुख: किं पुनर्यस्तथोच्चै:'' इति सूक्ते: सप्रसङ्ग भावार्थो लेख्य: । 2
9. वृत्तं कतिविधिम् ? तेषां नामानि लिखत । 2
10. कयोश्चिद् **द्वयो**: लक्षणं सोदाहरणं विवेचयत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

    (i) निरुक्तम् (ii) मिथ्याध्यवसाय: (iii) सिद्धि: ।
11. समाधिगुणं निरुप्य तदुदाहरणे संगति: विधेया । $1\frac{1}{2} + 1\frac{1}{2} = 3$

    **अथवा**

    ''रिपुं हत्वा यश: कृत्वा त्वदसि: कोशमाविशत्'' इत्यत्र को गुण: ? लक्षणेन सह संगति: करणीया ।
12. कयोश्चिद् **द्वयो**रलंकारयो: संगतिपूर्वकं लक्षणोदाहरणे विवेचयत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

    (i) छेकानुप्रास: (ii) रूपकम् (iii) विभावना ।
13. प्रस्तुतोदाहरणेषु **द्वौ** अलंकारौ परिचीय तयो: लक्षणोल्लेखपूर्वकं संगतिरपि करणीया — $1\frac{1}{2} + 1\frac{1}{2} = 3$

    (i) चन्दनं खलु गोविन्दचरणद्वन्द्ववन्दनम् ।

    (ii) अजरामरता कस्य नायोध्येव पुरी प्रिया ।

    (iii) नमन्तमपि धीमन्तं न लङ्घयति कश्चन: ॥
14. गौण-शुद्धादि-भेदात् षड्विधा लक्षणा सोदाहरणं निरूपणीया । 3
15. विवक्षितवाच्यध्वने: भेदान् विलिखत । 3
16. धर्मनिर्देशपूर्वकम् अभिधाभेदान् निरूपयत । 3
17. केषाञ्चन चतुर्णां दोषाणां लक्षणोदाहरणानि संगतिपूर्वकं लेखनीयानि — $4 \times 1 = 4$

    (i) निरर्थक: (ii) अविमृष्टविधेयांश: (iii) पतत्प्रकर्ष:

    (iv) प्रतिकूलाक्षर: (v) अपुष्टार्थ: (vi) ग्राम्य: ।
18. अधोलिखितालंकारयुग्मेषु **द्वयो**रलंकारयो: परस्परं भेद: लेखनीय: — $2 + 2 = 4$

    (i) अनन्वय: — उपमा

    (ii) सादृश्यरूपकम् — रूपितरूपकम्

    (iii) उत्प्रेक्षा — समासोक्ति: ।
19. कयोश्चिद् **द्वयो**: रसयो: लक्षणोदाहरणे विवेचयत — $2 + 2 = 4$

    (i) करुण: (ii) भयानक: (iii) अद्भूत: ।

20. निम्नलिखितेषु **द्वयोः** लक्षणं विलिख्य उदाहरणेषु संगमयत — 2 + 2 = 4

(i) अपराङ्गम् (ii) अस्फुटम् (iii) असुन्दरम् ।

21. सप्रसंग-व्याख्या विधेया — 5

प्रतिभैव श्रुताभ्याससहिता कवितां प्रति ।
हेतुमृदम्बुसम्बद्धा बीजमाला लतामिव ॥

**अथवा**

जयदेवानुसारं काव्यलक्षणं प्रतिपादयत ।

22. प्रस्तुतश्लोकस्य छन्दोऽलंकार निर्देशपूर्वकं सप्रसंग-व्याख्या करणीया — $\frac{1}{2} + \frac{1}{2} + 1 + 3 = 5$

धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः,
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे,
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥

**अथवा**

पाण्डुच्छायोपनवृतयः केतकैः सूचिभिन्नैः,
नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः,
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥

23. महाकविकालिदास्य व्यक्तित्वं कृतित्वञ्च लिखत । 5

24. सप्रसंगो भावार्थो लेख्यः — 1 + 4 = 5

प्रत्यासन्ने नभसिदयिताजीवितालम्बनार्थी,
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै,
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥

**अथवा**

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान् ,
पूर्वोद्दिष्टामुपसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानाम् ,
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥

25. (क) कयोश्चिद् **द्वयोः** छन्दसोः लक्षणोदाहरणे विलिख्य संगतिरपि करणीया — 3 + 3 = 6

(i) हरिणप्लुता (ii) चन्द्रलेखा (iii) रथोद्धता ।

(ख) प्रस्तुतोदाहरणे गणनिर्देशपूर्वकं छन्दः परिचीय तल्लक्षणमपि लेखनीयम् — 2

''यत्पलायन — परायणस्य ते'' ।